## एकादिश्चैकस्य चादुक्। (७६/८११)

[1]एकादिश्च नञ् प्रकृत्या भवति, एकशब्दस्य च आदुक् आगमो भवति । एकेन न विंशतिः एकान्नविंशतिः। एकान्नत्रिंशत् । तृतीया इति योगविभागात् समासः । पूर्वान्तोऽयमादुक् क्रियते पदान्तलक्षणोऽत्रानुनासिको विकल्पेन यथा स्यात् इति ॥

## नगोऽप्राणिष्वन्यतरस्याम्। (७७/७६०)

[2]नञ् प्रकृत्या भवति अन्यतरस्याम् । नगा वृक्षाः, अगा वृक्षाः । नगाः पर्वताः, अगाः पर्वताः । न गच्छन्ति इति नगाः । गमेर्डप्रत्ययः (उ. २३५) । अप्राणिषु इति किम् ? अगो वृषलः शीतेन ॥

## सहस्य सः सञ्ज्ञायाम्। (७८/१०००)

[3]सहशब्दस्य स इत्ययमादेशो भवति सञ्ज्ञायां विषये । साश्वत्थम् । सपलाशम् । सशिंशपम् । सञ्ज्ञायाम् इति किम् ? सहयुध्वा । सहकृत्वा । सादेश उदात्तो निपात्यते । उदात्तानुदात्तवतो हि सहशब्द-स्यान्तर्यतः स्वरितः स्यात् । स निपातनस्वरः पूर्वपदप्रकृतिस्वरत्वं यत्र तत्र [4]उपयुज्यते । अन्यत्र समासान्तोदात्तत्वेन बाध्यत एव, सेष्टि, सपशुबन्धम् इति ॥

## ग्रन्थान्ताधिके च। (७९/१०१०)

ग्रन्थान्ते अधिके च वर्तमानस्य सहशब्दस्य स इत्ययमादेशो भवति । सकलं ज्यौतिषमधीते । समुहूर्तम् । ससङ्ग्रहं व्याकरणम[5]धीयते । कलान्तं, मुहूर्तान्तं, सङ्ग्रहान्तम् इति अन्तवचने (२.१.६/६५२) इत्यव्ययीभावः समासः । तत्र अव्ययीभावे चाकाले (६.३.८१/६६०) इति कालवाचिन्युत्तरपदे समासो न [6]प्राप्नोति इत्ययमारम्भः। अधिके – सद्रोणा खारी । समाषः कार्षापणः । सकाकिणीको माषः ॥

## द्वितीये चानुपाख्ये। (८०/१०११)

द्वयोः सहयुक्तयोरप्रधानो यः स द्वितीयः[7] । उपाख्यायते प्रत्यक्षत उपलभ्यते यः स उपाख्यः । उपाख्यादन्यः अनुपाख्यः अनुमेयः । तस्मिन् द्वितीयेऽनुपाख्ये सहस्य स इत्ययमादेशो भवति । साग्निः कपोतः । सपिशाचा [8]वात्या । सराक्षसीका [9]शाला । अग्न्यादयः साक्षादनुपलभ्यमानाः कपोतादिभिरनुमीयमानाः [10]अनुपाख्या भवन्ति ॥

## अव्ययीभावे चाकाले। (८१/६६०)

अव्ययीभावे च समासे अकालवाचिनि उत्तरपदे सहस्य स इत्ययमादेशो भवति । सचक्रं धेहि । सधुरं [11]प्राज । अकाले इति किम् ? [12]सहपूर्वाह्णम् ॥

---

1. प्रकृत्या इति वर्तते इत्यधिकम् फ.ह.ग. 2. नग इत्यप्राणिषु अन्यतरस्यां नञ् ब.क.ड.फ, नग इत्यत्र नञ् अप्राणिषु अन्यतरस्यां ह. 3. उत्तरपदे इति वर्तते इत्यधिकम् फ. ह, सह इत्येतस्य फ. 4. प्रयुज्यते ह. फ, युज्यते क. 5. अधीते ब.फ. 6. भवति ह. 7. इत्युच्यते इत्यधिकम् ब. 8. रात्रयः ब. 9. निशा फ, विद्युत् ह, सराक्षसिका ड. 10. तदुपाख्याः फ. 11. व्रज फ.ह. 12. सहापराह्णम् फ.